**शतरूपा** स्त्री शतं रूपाण्यस्याः । १ब्रह्मणः पत्न्यां २तत्कन्यायां सावित्र्यां च “ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् । स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत् । शतरूपा च सा ख्याता सावित्री च निगद्यते । सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप । दृष्ट्वा तां व्यथितस्तावत् कामबाणार्द्दितो विभुः । उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् । ततः कालेन महता ततः पुत्रोऽभवन्मनुः । स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम्” मात्स्ये ३अ० ।

**शतवीर्य्या** स्त्री शतं वीर्य्याणि यस्याः ५ब०। १श्वेतदूर्वायाम् २शतावर्य्यां ३कपिलद्राक्षायां च राजनि० ।

**शतवेधिन्** पु० शतं विध्यति विध–णिनि । अम्लवेतसे अमरः

**शतसहस्र** न० शतगुणितं सहस्रं शाक०। लक्षसंख्यायाम् ।

**शतसाहस्र** त्रि० शतं सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः । लक्षसंख्याते ।

**शतह्रदा** स्त्री शतं ह्रादाः शब्दा यस्याः पृषो० ह्रस्वः । १विद्युति अमरः । २वज्रे मेदि० ३दक्षकन्याभेदे वाह्निपु०

**शताक्षी** स्त्री शतमक्षीणीव पुष्पाण्यस्याः अच् समा० ङीष् । १रात्रौ २शतपुष्पायाम् । शब्दच० ३दुर्गायाञ्च “भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि । मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा । ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् । कीर्त्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः” देवीमाहात्म्ये । [दूर्वे च राजनि० ।

**शताङ्ग** पु० शतमङ्गान्यवयवा यस्य । १रथे अमरः २तिनिश-

**शतानन्द** पु० शतमानन्दयति अण् । गोतमपुत्रे अहल्यागर्भजे १मुनिभेदे । स च जनकराजपुरोहितः । २देवकीनन्दने मेदि० ४ब्रह्मणि हेमच० ५विष्णुरथे त्रिका० । ६शतजनानन्दके त्रि० ।

**शतानीक** पु० शतमनीकानि यस्य । १व्यासशिष्ये मुनिभेदे २चन्द्रवंश्ये नृपभेदे मेदि० । ३सुदासराजपुत्रे भाग० ९।२२ अ० ।

**शतार** न० शतमराण्यस्य । वज्रे त्रिका० ।

**शतारुस्** न० शतं अरूंषि यत्र । कुष्ठभेदे “रक्तं श्यावं सदाहार्त्ति शतारुः स्याद् बहुव्रणम्” भावप्र० ।

**शतायुस्** त्रि० शतमायुर्वर्षकालोऽस्य । शतवर्षमितवयस्के “शतायुर्वै पुरुषः” श्रुतिः ।

**शतावरी** स्त्री शतमावृणोति आ+वृ–अच् गौरा० ङीष् । १शतमूल्याम् अमरः । “शतावरी गुरुः शीता तिक्ता ह्रीं रसायनी । मेधाग्निपुष्टिदा स्निग्धा नेत्रा गुल्मातिसारजित् । शुक्रस्तन्यकरी बल्या वातपित्तास्रशोथजित्” भावप्र० । २इन्द्रभार्य्यायां शब्दच० । ३शच्यां त्रिका० । [वर्त्तते णिनि । तत्रैव । शतावर्त्तिन् ।

**शतावर्त्त** पु० शतमावर्त्ता यस्य । विष्णौ हेमच० । शतधा

**शताह्वा** स्त्री शतं शतमूली शतपुष्पा वेति आह्वा यस्याः मध्यपदलोपः । १शतमूल्यां राजनि० २शतपुष्पायाञ्च जटा०

**शतिक** त्रि० शतेन क्रीतः, तस्य विकारः तस्येदं वा ठन् । १शतेन क्रीते पदार्थे । २तद्विकारे ३तत्सम्बन्धिनि च । शतमस्मै वृद्धिः आयः लाभः शुल्कम् उपदा वा दीयते ठन् । ४वृद्ध्यादिरूपेण शतदानसम्प्रदाने । पक्षे यत् शत्य तत्रार्थे । [व्येण क्रीतादौ शतिकशब्दार्थे ।

**शत्य** त्रि० शतेन क्रीतः शतिकशब्दवत् यत् । शतसंख्यातद्र-

**शत्रु** पु० शद–त्रुन् । १रिपौ राज्ञां २विषयानन्तरस्थे नृपे अमरः ३ज्योतिषोक्ते लग्नावधिकषष्ठस्थाने ४कामादिषु च । ५शातके त्रि० । [लक्ष्मणानुजे २रिपुनाशके त्रि०।

**शत्रुघ्न** पु० शत्रून् हन्ति हन–क । दशरथात्मजे सुमित्रागर्भजे

**शद** शातने शीर्णतायां भ्वा०पर०अक०अनिट् लृदित् । शीयते अशदत् । शत्स्यति ।

**शद** गतौ भ्वा०पर०सार्वधातुके आत्म० सक०अनिट् । शीयते

**शद** पु० शद–अच् । फलमूलादौ सिद्धान्तकौ० ।

**शद्रि** पु० शद–क्रि । १मेघे २जिष्णौ मेदिनी० ३गजे उणा०

**शद्रु** त्रि० शद–क्रु १पतनकर्त्तरि २गन्तरि च ।

**शनकावलि(ली)** स्त्री शनैः कायति कै–क पृषो० तेषामावलिर्यत्र वा ङीप् । गजपिप्पल्यां शब्दच० ।

**शनपर्णी** स्त्री शणस्येव पर्णान्यस्याः पृषो० णस्य नः । कटुक्याम् शब्दच० ।

**शनि** पु० शो–अनि किच्च । १सूर्य्यपुत्रे छायागर्भजाते ग्रहभेदे “शनिर्विहङ्गोऽनिलवन्ध्यवन्ध्या शूद्राङ्गना धातुःसमोऽस्थिरश्च । क्रूरः प्रतीचीतुवरोऽतिवृद्धोऽकरः स्थितोट् दीर्घसुनीललोहम्” । नील० ताज० । “मन्दोऽलसः कपिलकृन्तलदीर्घगात्रः स्थूलद्विजः परुषरोमकचोनिलात्मा” बृहज्जा० । २तत्स्वामिकदिने च “शनौ वन्ध्यां विजानीयात्” ज्यो० त० । [वारे ।

**शनिवार** पु० शनिस्वामिको वारः । सूर्य्यादिवारमध्ये सप्तमे

**शनैश्चर** पु० शनैश्चरति चर–अच् । शनिग्रहे तस्य ग्रहाणां मध्ये सर्वोपरिकक्षस्थितत्वात् बहुकालेनैकैकराशिभोगात् मन्दगमित्वम् । [अमरः ।

**शनैस्** अव्य०शण–डैसि पृषो० लुक् च । मन्दे २अशैघ्र्ये च